# भाषाशिक्षणे व्याकरणस्य योगदानम्

**विष्णु प्रसाद उपाध्याय**
वरिष्ठशोधाध्येता, सं.सं.प्र.

## सारांशः

*व्याकरणं भाषायाः केवलं नियामकः न, अपितु विश्लेषकः अपि अस्ति। भाषायाः गतिः व्याकरणेन अवरुद्धा न भवति। भाषा व्याकरणेन परिवर्तितापि न भवति। भाषा तु स्वगत्या चलति एव। व्याकरणं तस्याः गत्याः नियामकम् अस्ति, न तु अवरोधकम्।*

*भाषाविज्ञानं व्याकरणं च इति शास्त्रद्वयम् अस्ति। उभयोः कार्यक्षेत्रं भिन्नं भिन्नं वर्तते। द्वे अपि परस्परं सहयोगिनी स्तः। व्याकरणं पदप्रयोगं विचारयति, किन्तु भाषाविज्ञानं पदस्य मूलम्, धातोः अथवा प्रकृत्याः व्युत्पत्तीनां विश्लेषणं करोति। एवं वक्तुं शक्नुमः यत् व्याकरणं भाषायाः मित्रम् अस्ति तां सन्मार्गे चलितुं प्रेरयति।*

## प्रस्तावना

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिदं ज्ञानं सर्वं शब्देन भासते॥**[1]

(लोके एतादृशं किमपि ज्ञानं नास्ति यत् शब्दानुगमं विना स्यात्।
सर्वमपि ज्ञानं शब्देन सह संयुक्तं सत् प्रकाशितं भवति।)

सत्यमेव यत् कस्यामपि सभ्यतायां मानवस्य प्रत्येकं कार्याणि भाषाद्वारा एव सञ्चालितानि भवन्ति। मानवस्य मनोगतभावानां व्यक्तिगतविचाराणाञ्च आदानस्य प्रदानस्य च श्रेष्ठं साधनं भाषा एव। उक्तञ्च

**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥**[2]

वाणीनामेव प्रसादेन देवानारभ्य पामरपर्यन्तानां प्राणिनां लोकयात्रा प्रचलति।

प्रत्येकम् अपि जीवः यथा समाजात् वस्त्रादीनां धारणम्, उत्थानोपवेशनचलनादीनां क्रियाणां शिक्षणं प्राप्नोति, तथैव स्वकुटुम्बात्, स्वसमीपस्थात् वातावरणात् भाषामपि गृह्णाति। अतः एव भाषा इति सामाजिकं वस्तु अस्ति।

भाषया एव सर्वः अपि संसारः चलति। भाषा संसारस्य सर्वोत्तमा ज्योतिः अस्ति। भाषैव मानवानां हृदयस्थं तमः दूरीकरोति। भाषां विना संसारस्य स्थितिः कीदृशी भविष्यति इति कल्पनामपि कर्तुं न शक्नुमः। यदि शब्दरूपि ज्योतिः संसारे न भवति तर्हि चतुर्षु दिक्षु अन्धकारः एव भविष्यति –

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥**[3]

---

[1] वाक्यपदीयम् – ब्रह्म. - १२३
[2] काव्यादर्श – १ - ३
[3] काव्यादर्शः – १-४ द्रष्टव्यम्

इदं समस्तं भुवनत्रयं लोकत्रितयम् गाढान्धकारव्याप्तं जायेत, यदि शब्दाभिधानं ज्योतिः सृष्टिकालात् आरभ्य न प्रकाशेत।

भाषायाः एतत् वैशिष्ट्यमस्ति यत् एषा मूर्तस्यामूर्तयोः सदसतोः निर्वचनीयस्यानिर्वचनीययोः ज्ञाताज्ञातयोः भावाभावयोः सर्वविधानाम् अर्थानां प्रकाशनं करोति। भाषा संसारस्य सर्वोत्कृष्टा शक्तिः अस्ति। भाषा राष्ट्रस्य निर्माणं करोति। ऋग्वेदे भाषा अमृतस्य नाभिः एवञ्च देवानां जिह्वा इति उक्तम् अस्ति। लोकव्यवहाराद् एव भाषाशिक्षणस्य प्रक्रिया चलति। आचार्यौ पाणिनिपतञ्जली लोकव्यवहारमेव भाषाज्ञानस्य प्रमुखं साधनं मन्वाते। उक्तमेव

**लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः।**[4]

लोकव्यवहारेण अर्थस्य कृते शब्दस्य प्रयोगे सति शास्त्रं धर्मस्य नियमं करोति।

## भाषायाः अभिन्नाङ्गस्य व्याकरणस्य परिचयः

व्याकरणं भाषायाः एकम् अभिन्नम् अङ्गम् अस्ति। **व्याकरणं** तस्य नाम अस्ति, यस्मिन् भाषां शुद्धिकर्तुं नियमाः वर्णिताः सन्ति। कस्याः अपि भाषायाः समग्ररूपेण विश्लेषणं तथा च विवेचनं यत्र भवति तत् तस्याः भाषायाः व्याकरणमिति उच्यते। यथा - शरीरस्य समग्ररूपेण विश्लेषणं तथा च विवेचनं यत्र भवति तत् शरीरशास्त्रम् इत्युच्यते। तथैव व्याकरणमपि। व्याकरणं कामपि भाषां स्वकीयेन आदेशेन न चालयति, अपितु प्रत्यक्षतः प्रचलितायाः भाषायाः स्थितिं दृढीकरोति। यथा - **चलति** इति एकं क्रियापदम् अस्ति। चलति इत्यस्य अर्थं व्याकरणस्य पठनं विनापि सर्वेऽपि अवगच्छन्ति। व्याकरणम् एतद् भागद्वये विभजति, **चल्** इति **धातुः ति (तिप्)** इति प्रत्ययः। व्याकरणं सूचयति यत् कस्य शब्दस्य प्रयोगः कथं कर्तव्यः, कुत्र कर्तव्यः, केन रूपेण कर्तव्यः इति। भाषायां शब्दानां प्रवृत्तिः स्वभाविकरूपेण भवति, न तु व्याकरणद्वारा। किन्तु भाषायाः प्रवृत्त्यनुसारेण व्याकरणं शब्दानां प्रयोगस्य निर्देशनं करोति।

संसारस्य सर्वेऽपि भाषाविदः मन्यन्ते यत् अस्यां पृथिव्याम् उपलब्धेषु साहित्येषु प्राचीनतमं साहित्यम् ऋग्वेदः इति। यदा कापि भाषा साहित्यरूपेण प्रफुल्लिता भवति। तदा तस्य कृते व्याकरणस्य आवश्यकता भवति। एकदा देवताः विद्वांसः च ब्रह्मणः समीपं गत्वा प्रार्थनां कृतवन्तः यत् वेदभाषायाः व्याकरणं भवितव्यमिति। भवान् अस्माकं भाषायाः व्याकरणं निर्मातु इति। तदा ब्रह्मा **तथास्तु** इत्युक्त्वा देवतानां विदुषां च प्रार्थनां स्वीकृतवान्। इतः आरभ्यः व्याकरणस्य धारा प्रवाहिता। अतः एव उच्यते यत् व्याकरणस्य प्रथमस्रष्टा ब्रह्मा इति। उक्तं च

**ब्रह्मा बृहस्पतये प्रोवाच। बृहस्पतिः इन्द्राय। इन्द्रः भारद्वाजाय। भारद्वाज ऋषिभ्यः। ऋषयः ब्राह्मणेभ्यः इति।**

## भाषायाः शुद्धिकरणार्थं व्याकरणस्य ज्ञानम् अपेक्षितम् –

कस्याश्चित् सभायां राजा स्वपुत्रं वदति यत् - हे पुत्र ! यदि त्वम् अधिकं पठितुं न शक्नोषि तर्हि अपि चिन्ता नास्ति। किन्तु न्यूनातिन्यूनं व्याकरणं तु अवश्यमेव पठतु, यतो हि स्वजीवने स्वजनः (आत्मीयजनः) श्वजनः (कुक्कुरः) न भवेत्। सकलम् (सम्पूर्णम्) शकलम् (खण्डितं) न भवेत्। सकृत् (एकवारम्) शकृत् गोमयपिण्डं न भवेदिति। अतः अवश्यमेव व्याकरणं पठतु इति।

[4] महाभाष्यम्, पस्पशाह्निकम्

**व्याकरणं भाषायां प्रयुक्तानां शब्दानां इत्थं व्युत्पत्तिं करोति ।**

- प्र + कृ + अण् प्रकारः
- प्र + काश् + अच् प्रकाशः
- परा + जि + अच् पराजयः
- वि + ज्ञा + ल्युट् विज्ञानम्
- अनु + शास् + ल्युट् अनुशासनम्
- अनु + कृ + ल्युट् अनुकरणम्
- वि + अव + हृ + अण् व्यवहारः
- परि + ईक्ष् + अ + टाप् परीक्षा
- बुद् + क्तिन् बुद्धिः
- पठ् + घञ् पाठः
- शिक्ष् + अ + टाप् शिक्षा

इत्यादीनि बहूनि उदाहरणानि लोके प्राप्यन्ते । अत्र तु केवलं दिङ्मात्रदर्शनं कारितम्, अन्येऽपि बहवः अंशाः विद्यन्ते । भाषायाः शुद्धये व्याकरणस्य अपेक्षा अस्ति एव । व्याकरणज्ञानरहितः जनः नहि साधून् शब्दान् प्रयोक्तुं शक्नोति । ऋक्संहितायाम् अस्य व्याकरणस्य प्रशंसायाम् अनेके मन्त्राः विभिन्नेषु स्थानेषु उपलब्धाः भवन्ति । ऋग्वेदस्य एकस्मिन् सुप्रसिद्धमन्त्रे व्याकरणं वृषभस्य रूपकत्वेन प्रतिपादितमस्ति -

**'चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यॉं आविवेश ।।**[5]

अस्य वृषभरूपिणः व्याकरणस्य चत्वारि शृङ्गाणि सन्ति - **नाम-आख्यात-उपसर्ग-निपाताः इति** । अस्य त्रयः पादाः सन्ति, **भूत-भविष्य-वर्तमानाः** । द्वे शीर्षे स्तः - **नित्य-अनित्यशब्दौ (अथवा सुप्तिङौ) इति** । सप्त हस्ताः - **सप्त विभक्तयः ।** अयं वृषभः उरसि शिरसि कण्ठे च त्रिधाबद्धः सन् वारम्वारं शब्दं करोति । एतस्य शब्दस्य देवेन सह सायुज्यं स्थापयितुम् अस्माभिः व्याकरणम् अध्येतव्यम् ।

अन्यच्च

**'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।**
**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ।।**[6]

---

[5] महाभाष्यम्, पस्पशाह्निकम् (ऋ. सं. ४/५८/३)

[6] महाभाष्यम्, पस्पशाह्निकम् (ऋ. सं. १०/७१/४)

व्याकरणज्ञानाद् यः अनभिज्ञः अस्ति, सः शब्दं जानन् अपि न जानाति । शब्दं पश्यन् अपि न पश्यति । शब्दं शृण्वन् अपि न शृणोति अर्थात् कथनस्य अभिप्रायः अस्ति यत् शब्दस्य वास्तविकं तत्त्वं न जानाति, न पश्यति, न शृणोति इति । किञ्च यः जनः व्याकरणविज्ञः अस्ति, तत्सन्निधौ वाणी सुसज्जिता कामिनी इव समागत्य सर्वतोभावेन समर्पिता भवति, अर्थात् सः शब्दस्य वास्तविकं तत्त्वं जानाति, पश्यति श्रृणोति च इति ।

समाजे प्रचलितानां भाषानियमानां व्याख्यानमेव व्याकरणस्य मुख्यं प्रयोजनम् अस्ति । एतदतिरिक्तम् अन्यानि अपि प्रयोजनानि सन्ति –

**यथा -**

- व्याकरणं भाषायाः प्रयोगसम्बद्धानां नियमानां ज्ञानं कारयति ।
- व्याकरणं भाषायाः संरक्षणं संवर्धनं च करोति ।
- व्याकरणं लिखितभाषायां विद्यमानान् दोषान् परिमार्जयति ।
- व्याकरणं भाषायाः शुद्धोच्चारणं शिक्षयति ।
- व्याकरणं विशेषशब्दरचनानां व्याख्यानं करोति ।
- व्याकरणं भाषायां विद्यानानां वर्णानां शब्दानां वाक्यानां सिद्धान्तानां च ज्ञानं कारयति ।
- व्याकरणं स्वनियमैः भाषाम् अनुशास्ति ।

व्याकरणं भाषायाः शुद्धतायाः साधनम् अस्ति, न तु साध्यम् । सर्वासु भाषासु संज्ञा, परिभाषा, सर्वनाम, विशेषणानि, क्रियाविशेषणानि, सन्धिः, समासः कारकम् एतानि तत्त्वानि भवन्त्येव । तथैव व्याकरणे अपि एतानि सर्वाणि तत्त्वानि विद्यन्ते ।

व्याकरणे प्रमुखतया त्रयः मुनयः सन्ति । ते च –

**१. पाणिनिः २. कात्यायनः ३. पतञ्जलिः इति ।**

सूत्राणां सन्दर्भे प्रथमं सूत्रात्मिकाम् अष्टाध्यायीं निर्मितवान् भगवान् पाणिनिः । अस्यां प्रायः चतुस्सहस्रम् (४०००) सूत्राणि सन्ति । एषः एव सूत्रपाठः कथ्यते ।

सूत्रमयी इयम् अष्टाध्यायी अष्टसु अध्यायेषु विभक्ता अस्ति । तत्र प्रत्येकस्मिन् अध्याये चत्वारः पादाः सन्ति ।

**तेषु अध्यायेषु सामान्यतया के के विषयाः सन्ति, अधः पश्यामः -**

| | | |
|---|---|---|
| प्रथमे अध्याये | - | संज्ञापरिभाषासूत्राणां वर्णनम् अस्ति । |
| द्वितीये अध्याये | - | विभक्ति-कारक-समासविधायकानां सूत्राणां वर्णनम् अस्ति । |
| तृतीये अध्याये | - | धातुभ्यः विहितानां कृदन्तप्रत्ययानां वर्णनम् अस्ति । |
| चतुर्थे अध्याये | - | प्रातिपदिकेभ्यः सुबन्तेभ्यः च विहितानां तद्धितप्रत्ययानां वर्णनम् अस्ति । |

पञ्चमे अध्याये - तद्धितप्रत्ययानाम् एव वर्णनम् अस्ति।

षष्ठे अध्याये - प्रकृतिप्रत्ययसम्बन्धिकार्याणां तथा च तिङ्-सन्धि-स्वरादिविधायकानां सूत्राणां वर्णनम् अस्ति।

सप्तमे अध्याये - अङ्गसम्बन्धिप्रत्ययसम्बन्धिसूत्राणां वर्णनम् अस्ति।

अष्टमे अध्याये - अस्मिन् अध्याये द्वित्व-णत्व-सत्व-आदेश-विधायकानि सूत्राणि सन्ति।

भाषायां समरूपताम् आनेतुं सिद्धान्तानामेवञ्च नियमानां यः समूहः अस्ति तदेव व्याकरणमिति। अर्थात् व्याकरणं भाषां नियमयति। अतः एव प्राचीनकालादेव भाषाशिक्षणसन्दर्भे व्याकरणस्य शिक्षणं दीयते स्म प्रकृतिप्रत्ययद्वारा यत्र भाषायाः व्याख्यानं क्रियते तदेव व्याकरणमस्ति। व्याकरणेन शब्दार्थसम्बन्धानां विवेचनं भवति।

भाष्यकारपतञ्जलिना स्वकीये महाभाष्ये **शब्दानुशासनमेव व्याकरणमिति**[7] प्रोक्तम्। अर्थात् शब्देषु यः अनुशासनं करोति तदेव व्याकरणमिति। वस्तुतस्तु व्याकरणं भाषायाः कृते नियमान् न निर्माति अपितु लोकं समाजं च दृष्ट्वा शिष्टवर्गद्वारा यादृश्याः भाषायाः प्रयोगः क्रियते अर्थात् यस्य शब्दस्य यद् रूपं प्रसिद्धमस्ति, यस्मिन्नर्थे तस्य प्रयोगः भवति, तमेव आधारीकृत्य व्याकरणनियमान् रचयति। भाषायाः नियमकारणेनैव एतस्य नाम अनुशासनमिति जातम्।

यदा शिशुः जन्मारभ्य एव मातापितृभ्यां, मित्रेभ्यः, विद्यालयात् भाषां शृणोति, भाषायाः अनुकरणं च कुर्वन् स्वभाषाज्ञानं वर्धयति। किन्तु अनुकरणात् शिक्षिता भाषा दोषरहिता अस्ति अथवा नेति, ज्ञानं न भवति। अतः एतादृशीं भाषां प्रमाणीकर्तुमेव व्याकरणशिक्षणस्य अपेक्षा भवति। यतो हि भाषायां वाक्यानि, वाक्येषु शब्दाः, शब्देषु वर्णाः भवन्ति, एतासां स्थितीनां निर्धारणं व्याकरणस्य साहाय्येनैव भवति। व्याकरणस्य साहाय्येन वयं भाषायां विद्यमानाभिः वर्णविन्यास-शब्दरचना-वाक्यरचनाभिः परिचिताः भवेम।

## सन्दर्भ-ग्रन्थाः :


1. श्रीसूर्यनारायण शुक्ल, **वाक्यपदीयम् (ब्रह्मकाण्डम्)** भर्तृहरि, चौखम्बा संस्कृत संस्थान वाराणसी पुनर्मुद्रण वि.सं. २०६९
2. आचार्य श्रीरामचन्द्रमिश्र, **काव्यादर्श दण्डी**, चौखम्बा संस्कृत संस्थान वाराणसी
3. युधिष्ठिर मीमांसक, **महाभाष्यम् (प्रथम खण्ड)** पतञ्जलि प्रथम, प्रकाशक रामलाल कपूर ट्रस्ट बहालगढ़ (सोनीपत हरियाणा) द्वितीय संस्करण वि.सं. २०४९


[7] महाभाष्यम्